द्दिवाकरम् । तपनस्तोषमायाति वह्निष्टोमस्य विन्दति । अपूपैः सगुडैर्भक्त्या तथा लवणपाचितैः । सहिरण्यैः समभ्यर्च्य वह्निष्टोमफलं लभेत् । सूर्य्याह्नि यस्तु नक्ताशी संपूजयति भास्करम् । इष्टान् कामानवाप्नोति सूर्य्यलोकञ्च गच्छति" । कालोत्तरे "आश्विन्यादित्यवारे तु यदि शुक्ला चतुर्दशी । स्नानं विशेषतः कार्य्यं शिवस्य परमात्मनः । अङ्गरागं रोचनया रक्तपुष्पैः प्रपूजयेत् । कपिलाज्यं तथा क्षीरं नैवेद्यं परिकल्पयेत्" । पद्मपु० "माघमासेरुषसि स्नानं कृत्वा दम्पत्यमर्चयेत् । भोजयित्वा यथाशक्त्या माल्यवस्त्रविभूषणैः । सौभाग्यपदमाप्नोति शरीरारोग्यमुत्तमम् । सूर्य्यलोकप्रदं नूनं सूर्य्यव्रतमिदं स्मृतम्" । भविष्यपु० "कृत्वैकभक्तं हेमन्ते माघमासमतन्द्रितः । मासान्ते च रथं कुर्य्याच्चित्रवस्त्रोपशोभितम् । श्वेतैश्चतुर्भिर्युक्तन्तु तुरगैः समलङ्कृतम् । श्वेतध्वजपताकाभिः छत्रचामरदर्पणम् । तण्डुलाढकपिष्टेन कृत्वा भानुं नराधिप ! । विन्यस्य तं रथस्थं संज्ञया सह भूपते ! तं रात्रौ राजमार्गेण शङ्खभेर्य्यादिभिः स्वनैः । भ्रामयित्वा शनैः पश्चात् सूर्य्यायतनमानयेत् । तत्र चागुरुपिष्टेन प्रदीपाद्युपशोभितम् । प्रेक्षणीयप्रदानैश्च क्षपयित्वा शनैः शनैः । प्रभाते स्नपनङ्कृत्वा पयसा वा घृतेन वा । दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणाम् । रथं संवाहनोपेतं भास्कराय निवेदयेत् । भुक्त्वा च ब्राह्मणैः सार्द्धं प्रयात्यर्कं स्वकं व्रजेत्" । सौरधर्म्मोत्तरे "शृणु राजन् ! प्रवक्ष्यामि यद्गुह्यं व्रतमुत्तमम् । सर्व्वकामप्रदं पुंसां कुष्ठादिव्याधिनाशनम् । भानोस्तुष्टिकरं राजन् ! भुक्तिमुक्तिप्रदायकम् । तस्य देवस्य वक्ष्यामि व्रतं राजन् ! सविस्तरम् । पूजार्घ्यं प्राशनं दानं नैवेद्यं शृणु तत्त्वतः । सर्व्वतीर्थेषु यत् पुण्यं सर्व्वयज्ञेषु यत्फलम् । सर्व्वदानेन तपसा यत् पुण्यं समवाप्यते । प्रातःस्नानेन यत् पुण्यं यत् पुण्यं रविवासरे । मार्गशीर्षादिमासेषु द्वादशस्वपि भूपते ! । सूर्य्यव्रतं करिष्यामि यावद्वर्षं दिवाकर ! । व्रतं संपूर्णतां यातु त्वत्प्रसादात् प्रभाकर !" इत्यादि ।

सूर्य्यनक्तव्रतं मत्स्यपु० "तस्मादादित्यवारेण सदा नक्ताशनो भवेत् । यदा हस्तेन संयुक्तमादित्यस्य च वासरम् । उत्पद्यते यदा भक्तिर्भानोरुपरि शाश्वती । तदादित्यदिने कुर्य्यादेकभक्तं विमत्सरः । तदारभ्य सदा कार्य्यं नक्तमादित्यवासरे । नक्तमादित्यवारेण भोजयित्वा द्विजोत्तमान् । ततोऽस्तसमये भानो रक्तचन्दनपङ्कजम् । विलिख्य द्वादशदलं पूज्य सूर्य्येति पूर्व्वतः" । "इत्यनेन विधानेन वर्षमेकन्तु यो नरः । नक्तमादित्यवारेण कुर्य्यात् स नीरुजो भवेत् । धनधान्यसमायुक्तः पुत्रपौत्रसमन्वितः । मर्त्त्ये स्थित्वा चिरं कालं सूर्य्यलोकमवाप्नुयात्" ।

सूर्य्यषष्ठीव्रतं भविष्योत्तरे "मासि भाद्रपदे शुक्ले एकभक्ताशनो भवेत् । दन्तधावनपूर्व्वन्तु षष्ठ्यामुपवसेन्नरः । गौरसर्षपकल्केन स्नायात् कायविशुद्धये । रोचनाकृष्णगोमूत्रमुस्ताचन्दनगोशकृत् । दधिकालागुरुश्चैव ललाटे तिलकं न्यसेत् । शिलादर्पदलैश्चैव सौभाग्यारोग्यकृद्यतः । स्रजं कुङ्कुमताम्बूलं सिन्दूरं रक्तवाससी । वितरेत् सोपवासा हि नारी मङ्गल्यवर्द्धनम् । विधवा तु विरक्तानि कुमारी शुक्लवाससी । ततः स्वभवने भानुं पूजयेत् शीतलोदकैः । अपराह्णे ततः स्नात्वा तूष्णीं नियतव्रतः । प्रतिमां स्नपयेद्भानोः पञ्चगव्येन वारिणा । रक्तचन्दनपङ्केन कुङ्कुमेन समालभेत् । अगस्त्यकुसुमैरक्तैः करवीरैः प्रपूजयेत्" ।

सूर्य्यसप्तमीव्रतं विष्णुधर्म्मोत्तरे "चैत्रे शुक्लस्य पक्षे तु सम्यक् षष्ठ्यामुपोषितः । सप्तम्यामर्च्चनं कुर्य्याद्देवदेवस्य भूपते ! । बहिःस्नानं नरः कृत्वा गोमयेनोपलेपितः । लेपयेत्स्थण्डिलं सम्यक् ततो गौरमृदा नृप ! । तत्राष्टदलकमलं वर्णकैस्तु समं लिखेत्" इत्यादि ।

सोमद्वितीयाव्रतं पद्मपु० "दद्यात्सितद्वितीयायां शिम्बोर्लवणभोजनम् । समाप्ते गोप्रदो याति विप्राय शिवमन्दिरम्" विप्राय शिम्बोर्लवणभोजनं दद्यादित्यन्वयः । सोमस्यात्र देवता सोमव्रतमिदं स्मृतमिति सोमस्य देवतात्वं गम्यते । "कल्पान्ते राजराजस्य सोमव्रतमिदं स्मृतम्" ।

सोमव्रतं कालोत्तरे "चन्द्राष्टम्यां रोहिण्यां स्यात्तदा चन्द्रव्रतञ्चरेत् । शिवं सम्पूज्य विधिवत् स्नानैः पञ्चामृतादिभिः । विलेपनन्तु चन्द्रेण चन्दनेन तु वा हितम् । शुक्लवस्त्रैस्तथा पुष्पैः पूजयेत् परमेश्वरम् । नैवेद्यं क्षीरकुल्यन्तु सितशर्करया युतम् । प्राशनं चन्दनेनैव रात्रौ जागरणं हितम् । आयुःकामैः सदा कार्य्यं कीर्त्तिश्रीसाधने हितम् । इति चन्द्रव्रतं नामोदारदानेन जायते" । कालिकापु० "वारे सोमस्य वाष्टम्यां पक्षोभौ सोऽर्च्चयेत् । विधिना चन्द्रचूडाङ्कं प्राज्याज्येन सचन्द्रकम्" । पक्षोभौ अतोभयत्र पक्षे नियमोऽष्टमीसोमवारयोः संयो-